**दिनाङ्क :-26.12.2024** **प्रात: - 06:55**

**इयम् आकाशवाणी**
**सम्प्रति वार्ता: श्रूयन्ताम्**
**अथ वार्ता:**

**राष्ट्रपति:-बाल-पुरस्कार:**

राष्ट्रपतिः द्रौपदीमुर्मु: अद्य नवदिल्ल्यां सप्तसु वर्गेषु अद्वितीय-उपलब्धीनां कृते सप्तदश बालेभ्य: 'प्रधानमन्त्री-राष्ट्रीय-बाल-पुरस्कारं' प्रदास्यति। एते बाला: चतुर्दश राज्यै: केन्द्रशासितप्रदेशै: च सम्बद्धा: सन्ति। प्रशासनं कला-संस्कृति- वीरता-नवान्वेषण-विज्ञान-प्रौद्योगिकी-समाजसेवा- क्रीडा-पर्यावरण- इत्यादिषु क्षेत्रेषु उत्कृष्ट-उपलब्धीन् सम्मानयितुं मान्यतां च प्रदातुं बालपुरस्कारं प्रददाति। प्रत्येकस्मै पुरस्कारविजेत्रे पदकम्, प्रमाणपत्रं, प्रशस्ति-पुस्तिकां च प्रदास्यते।

**प्रधानमन्त्री – वीरबालदिवस:**

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्या: भारतमण्डपमस्थाने भारतस्य भविष्यस्याधाररूपेण बालानां सम्मानं कर्तुं राष्ट्रव्यापिनि वीर-बाल-दिवस-समारोहे भागं ग्रहीष्यति। अत्रावसरे असौ जनसमागमम् अपि सम्बोधयिष्यति। द्वाविंशत्यधिक-द्विसहस्रतमे वर्षे श्रीमोदी अघोषयत् आसीत् यत् दिसम्बरमासे षड्विंशे दिनाङ्के गुरूगोविन्द सिंहस्य पुत्राणां साहिबजादे इत्येतेषां वीरताया: त्यागस्य च स्मरणार्थं वीर-बाल-दिवस: आचरिष्यते इति।

**प्रधानमन्त्री – परियोजनामध्यप्रदेश:**

प्रधानमन्त्री नरेन्द्रमोदी ह्य: पूर्वप्रधानमन्त्रिणः भारतरत्न- अटलबिहारी- वाजपेयिवर्यस्य शततम्या: जयन्त्या: अवसरे मध्यप्रदेशस्य खजुराहो- स्थले देशस्य प्रथमायाः महत्त्वकांक्षिणः बहुद्देशीय-केन-बेतवा-राष्ट्रिय-नदी-संयोजन- परियोजनायाः शिलान्यासं कृतवान्। अत्रावधौ प्रधानमन्त्रिणा देशस्य प्रथमायाः ओङ्कारेश्वर-फ्लोटिंग-सोलर-इत्यस्याः परियोजनायाः अपि उद्घाटनं विहितम्। अत्रावसरे प्रधानमन्त्री त्रिपञ्चाशदधिकैक-शतोत्तरैकसहस्र-संख्यकानाम् अटलग्राम- सुशासन भवनानां भूमिपूजनमपि अकरोत्। श्रीमोदी वाजपेयि- वर्यस्य स्मृतौ एकां प्रैष्य- चिटिकां मुद्रामपि प्रकाशितवान्।

**अमितशाह:**

केन्द्रीयगृहसहकारितामन्त्री अमितशाहः ह्य: नवदिल्ल्यां दशसहस्राधिकं नवस्थापिताः बहूद्देशीय – प्राथमिक – कृषि – सहकारिसंस्थाः, दुग्धोत्पादक- मत्स्यपालनसहकारिसंस्थाः च राष्ट्राय समर्पितवान्। असौ राष्ट्रिय- सहकारिता- सम्मेलना वधौ समये नवसङ्घटित- सहकारिता- समितये पञ्जीकरणप्रमाणपत्राणि, रुपे किसानक्रेडिट्कार्ड्, माइक्रो- एटीएम इत्येतानि च वितरितवान्। एतैः वित्तीयपत्रैः पञ्चायतेषु ऋणसुविधाः वित्तीयसमावेशं च वर्धिष्यति। अपि च ग्रामीणेभ्यः योजनानां लाभः सरलतया भविष्यति। एताः समितयः ग्रामीण- क्षेत्रेषु सहकारि संस्थानानां विकासकार्ये सहायकाः भविष्यन्ति। मन्त्रिणा सबलं प्रकाशितं यत् पूर्वंयदा देशे आधारभूत- संरचनाभ्यः प्राथमिकता नैव प्रदत्तासीत् तदा पूर्वं प्रधानमन्त्रिणा अटल बिहारी वाजपेयिवर्येण स्वर्णिम- चतुर्भुज- मार्गः शुभारम्भितः।

**अफगानिस्तान-मृता:**

अफगानिस्तानदेशस्य अल्पकालिकं तालिबान-प्रशासनम् समुद्घोषयत् यत् पूर्वीय-पक्तिका-प्रान्ते पाकिस्तान-सम्बद्धै: विमानै: पाक्तिकाया: बरमल-जनपदस्य चतुर्षु स्थानेषु विस्फोटाक्रमणं कृतवत्। येन हि षड्चत्वारिंशज्जना: मारिता:। सूचनेयं अल्पक ालिक-तालिबान प्रशासनस्य उप-प्रवक्त्रा मुल्ला-हमदुल्ला-फितरत-इत्यनेन प्रदत्ता।

**<u>भारोत्तोलन-प्रतियोगिता</u>**

भारोत्तोलन-प्रतियोगितायां, मार्टिना-देवी ह्यः दोहायां एशियाई-कनिष्ठ वर्गीयायां प्रतिस्पर्धायां महिलानां कनिष्ठदलस्य सप्ताशीति-किलोग्रामभारमितस्य वर्गे रजतपदकं विजितवती। मणिपुरस्य एषा अष्टादश वयोवर्गीया विजेत्री आहत्य पञ्चविंशत्यधिक द्विशतं किलोग्राम भारं उत्थापितवती।

**।।इति वार्ता:।।**